उपशास्त्री-I साहित्य - तृतीय-पत्रम्

किरातार्जुनीयम् महाकाव्यम्

प्रथमः- सर्गः

Date ___/___/___

प्र० (1) - पद्यमिदम् व्याख्येयम् ?

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः।
न संहतास्तस्य न भिन्नवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम्॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस्य किरातार्जुनीयम महाकाव्यस्य प्रथम सर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके वनेचर दुर्योधनस्य शासन-कुशलतायाः वर्णनं करोति -

अतिबलशालिनोऽहङ्कारिणः लब्धानेकपारितोषिकाः संग्राम-प्राप्तयशसः, स्वार्थसाधनाय न संघीभूताः, स्वाम्यनुज्ञायां च ये न पृथङ्मतयः वीरभटाः स्वामिनो दुर्योधनस्य स्वप्राणव्ययेनाऽपि हितं कर्तुं वाञ्छन्ति।

व्याख्या:- महौजसः = अत्यन्त तेजस्वी। मानधनाः = कीर्ति को ही धन मानने वाले। धनार्चिताः = (राजा के द्वारा) प्रचुर धन से पुरस्कृत। संयति = युद्ध में लब्धकीर्तयः = यश कमाये हुए। न संहताः = (स्वार्थसिद्धि के लिए अथवा राजा के विपरीत), एक न करने वाले। न भिन्नवृत्तयः = स्वच्छन्द होकर अपने-अपने मन की न करने वाली। धनुर्भृतः = धनुर्धारी (योद्धा), असुभिः = (अपने) प्राणों से भी, तस्य = उस दुर्योधन के, प्रियाणि = कार्यों को, समीहितुं = करना, वाञ्छन्ति = चाहते हैं।

Renu Devi

06/08/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया

उपशास्त्री-II साहित्य- तृतीय- पत्रम्
किरातार्जुनीयम् महाकाव्यम्
प्रथमः सर्गः

Date __/__/__

प्र०(1) पद्यमिदम् व्याख्येयम्:-
वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ॥

उत्तरम्:— प्रसंगः— प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति।
प्रस्तुत श्लोके द्रोपदी युधिष्ठिरं प्रति कथयति— भूमिशयनात् संजातकर्कश शरीरौ विकीर्णरूक्ष मूर्धजौ चैतौ यमजौ नकुलसहदेवौ विलोक्य कथमिदानीमपि त्वं संतोष धैर्यं चावलम्बसे इति महदाश्चर्यम् ।

व्याख्या:— वनान्तशय्याकठिनीकृताकृती = वन भूमि में सोने से कठोर हो गई है देह जिनकी ऐसे, विष्वक् = चारों ओर कचाचितौ = केशों से व्याप्त । (अर्थात् जिनके सिर के बाल बढ़ कर देह के चारों ओर लटके हैं ऐसे ) अगजौ = पहाड़ में उत्पन्न । गजौ इव = हाथियों की तरह (दीखते हुए)।
एतौ यमौ = इन जुड़वाँ (नकुल - सहदेव) को । विलोकयन् = देखते हुए (भी) । त्वं = तुम । धृति संयमौ = संतोष और धैर्य को । बाधितुं = छोड़ने के लिए । कथं न उत्सहसे = क्यों नहीं तैयार होते ? ।

Renu Devi
06/08/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया।

शास्त्री - II

साहित्य
रघुवंश महाकाव्यम्
त्रयोदशः सर्गः

Date ___/___/___

प्रश्न(1) - पद्यमिदम् व्याख्येयम् ?

गर्भं दधत्यर्कमरीचयोऽस्माद्विवृद्धिमत्राश्नुवते वसूनि ।
अबिन्धनं वह्निमसौ बिभर्ति प्रह्लादनं ज्योतिरजन्यनेन ।।

उत्तरम् - प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदासस्य विरचितस्य रघुवंश महाकाव्यस्य त्रयोदश सर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके श्रीरामः सीतां समुद्रवर्णन कथयति — सूर्यरश्मयो हि सागरादेवापो गृह्णन्ति । अस्यैव विविधानि रत्नानि समुद्रमुद्भवन्ति । सागरे एव वडवानलो विराजते । चन्द्रमस उद्भवोऽपि समुद्रादेवाजायतेति भावः ।

व्याख्या — अर्कमरीचयः = भास्करकिरणाः । अस्मात् = समुद्रात् । गर्भम् = जलमयं कोषम् । दधति = वृष्ट्यर्थं धारयन्ति । अत्र = समुद्रे । वसूनि = धनानि । विवृद्धिम् = समृद्धिम् । अश्नुवते = प्राप्नुवन्ति । असौ = समुद्रः । अबिन्धनम् = जलदाहकम् । वह्निम् = अनलम् । बिभर्ति = धारयति । अनेन = समुद्रेण । प्रह्लादनम् = आह्लादकम् । ज्योतिः = प्रकाशश्चन्द्रः । अजनि = जनितम् ।

Renu Devi
06/08/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No. ___

शास्त्री-I साहित्य

अभिज्ञानशाकुन्तलम्

Date ___/___/___

प्र० (1) पद्यमिदम् व्याख्येयम् ?

स्त्रीणामशिक्षितपटुत्वममानुषीषु
संदृश्यते किमुत याः प्रतिबोधवत्यः ।
प्रागन्तरिक्षगमनात् स्वमपत्यजात-
मन्यैर्द्विजैः परभृताः खलु पोषयन्ति ॥

उत्तरम् = प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदासस्य विरचितस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य पञ्चमोऽङ्कात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके महर्षि कण्वस्य पुनीते आश्रमे संवर्द्धिता न किमपि कैतवाचारं जानातीति गौतमीवचनं निशम्य राजा दुष्यन्तः सोपहासं स्त्रीस्वभावं विवृणीति-

व्याख्या — स्त्रीणां = नारीणां स्त्रीजातिसमुत्पन्नानां अमानुषीषु = मनुष्यव्यतिरिक्तासु वागादिव्यवहाररहितास्वपि तासु अशिक्षितं च पटुत्वं चेति अशिक्षितपटुत्वम् उपदेशमन्तरापि नैसर्गिकवञ्चनाचातुर्यं संदृश्यते = विलोक्यते प्रतिबोधवत्यः प्रतिबोधोऽस्ति आसामिति प्रतिबोधवत्यः = हस्तपाद-वागादिव्यवहारकुशलाः शिक्षाशालिन्यश्च मनुष्यः किमुत = तासां कौमले तु पुनः किं वक्तव्यम् । परभृताः = परैः अन्यैः पक्षिभिः भ्रियन्ते इति परभृताः = कोकिलाः स्वं = स्वकीयं अपत्यजातम् = सन्तति समूहम् अन्तरिक्षगमनात् = आकाशगमनात् उड्डयनशक्त्युत्पत्तेः पूर्वम् अन्यैः = अपरैः द्विजैः पक्षिभिः काकैः परिपोषयन्ति = परितः सर्वप्रकारेण पालयन्ति खलु = प्रसिद्धिः । कोकिला हि समुत्पन्नानि स्वानि अपत्यानि कुलायेषु निक्षिपन्ति काकाश्च तानि स्वापत्यबुद्ध्या तानि परिपालयन्तीति कविप्रसिद्धिः ।

शेषः पृष्ठः आग्रे

शेष
पृष्ठ

अभिज्ञान शाकुन्तलम्

अयं भावः — अशिक्षिता अपि स्त्री जातिस्वभावत एव व्यवहारकुशला भवन्ति दाक्ष्यशिक्षाशालिन्यः वाग्व्यवहारनिपुणाः तासां कौशले किं वक्तव्यम् । कोकिलाङ्गनाः किल वर्णेन सदृशानि स्वकीयानि अपत्यानि उड्डयनाशक्त्युत्पत्तिपर्यन्तं काकपक्षिद्वारा परिपोषयन्ति । अतस्ताः परभृताः प्रोच्यन्ते । तदेवं तिर्यग्जातिष्वपि वाग्बुद्धिव्यवहारशून्या स्त्रियः कपटपटवः स्युस्तर्हि किमु वक्तव्यं शिक्षितानां वाग्व्यवहार प्रवीणानां बुद्धिमतां मानुषीणां नारीणां कपटपाटवविषये । तस्मात्तपोवने वर्द्धितेयं तत्रभवती स्त्रीसुलभं वञ्चनकौशलं न जानातीति भवत्याः कथनं सर्वथालीकमेव मे प्रतिभातीति भावः । परभृतादि दृष्टान्तेन स्त्रीत्वेन हेतुना नारीमात्रस्य मृषाभाषणत्वं प्रसिद्धम् परभृतेव शकुन्तला माता मेनकापि एनां समुत्पाद्य वने विसृज्यान्यैः पक्षिभिः पालितवतीति सूच्यते ।

अत्राप्रस्तुतप्रशंसाऽर्थान्तरन्यासव्यतिरेकालंकाराः वसंततिलका वृत्तं च ।

Renu Devi
06/08/20
राधा उमाकान्त सं० महावि० सुरवसेना,
पूर्णिया ।